M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 19

Title: Ekadasyam Homahavan

Sathe

19

Ekadasyam Homakaran Nirnaya	: Title
	: Author
	: Editor
	: Year, Vols.
	: Publisher
~~10~~ 19	: Remarks

ए॰ नि॰ ॥श्रीगणेशाय नमः॥ ॥श्रीरामसीताकांताय नमः॥ ॥ननु ओउविलो क्करीत्या पंचत्रिंशद्दिनसाध्यप्रसिद्धीपोक्तरीत्या षट्त्रिंशद्दिनसाध्य
१ सुनक्षत्रे ऽपि प्रवर्तमाना सु मध्ये एकादश्यां प्राप्तौ तस्या मध्ये होमे केचिद्विधानेनावश्यं प्राप्तस्य तत्र क्षेत्रेष्वनुष्ठानस्यैव सर्वैः कर्तुमशक्
त्वात्कथं तस्यां तदनुष्ठानमिति॥ न चैकादश्यां तन्नक्षत्रे ह्यनुष्ठानं कुतो नुक्तमेवंतीति वाच्यं॥ तस्यां होमसामान्यस्यैव निषिद्धत्वेन तद्वि
शेषभूतस्याप्यनुष्ठानस्य सुतरामसंभवात्॥ न च तस्यां होमसामान्यस्य निषिद्धत्वे मानं कुतः इति वाच्यं॥ रटंती हि पुराणानि भूयो भूयो वरा
नने॥ न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे॥ वरं स्वमातृगमनं वरं गोमांसभक्षणं॥ वरं हत्या सुरापानमेकादश्यन्नभोजनात्॥ अष्टव
र्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः॥ यो भुंक्ते मामके राष्ट्रे विष्णोरहनि पापकृत्॥ स मे वध्यश्च दंड्यश्च निष्कास्यो विषयाद्बहिरिति क
नारदीयवचनेन॥ एकादश्यामन्नं भुंजीत नरस्तु रोगश्च यदि वेत्कृतं॥ ब्राह्मणो नेन दहंत बाह्यलेषा वेदिकी स्मृतिरिति पाद्मवचनेन
॥पातकानि च पापानि ब्रह्महत्यासमानि च॥ अन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे इति नारदीयवचनेन॥ स केवलमघं
भुंक्ते यो भुंक्ते हरिवासरे॥ दिने त्वं सर्वपापानि भक्ष्येंतस्य च्छि तानि वै॥ इति ब्रह्मवैवर्तवचनेन॥ वरं स्वमातृगमनं वरं गोमांसभ
क्षणं॥ कारणं पितृवधस्यापि तथा स्त्रीवधस्य च॥ गोवधादि महापापं स्त्रीवधाद्युपपातकं॥ अनस्थिजीवहननमेष्वेकमष्टत राम॰
मं मतं॥ श्रुतिस्मृतिपुराणेषु चैकादश्यन्नभोजनमिति वायुपुराणवचनेनैकादश्यां गर्हितान्नभोजननिषेधकेन तल्लक्षणा १
या तस्य पापवत्त्वसाधकानि कर्माणि भोजनश्राद्धहोमादीनि तेषां सर्वेषामपि निषिद्धत्वात्॥ न हि उक्तलेतत्साध्यं कर्मविधानं हुश

क्यते॥ अत्र प्रसंगागतश्राद्धनिर्णयो विक्रियते॥ न च तद्वाक्यस्यान्नभोजनमात्रमेव प्रतिषेधतीति॥ न श्राद्धहोमादिरिति चेत्तन्न॥ अतिप्रसक्तात्वि
रहात्॥ अन्यथा काकवंध्याजातिसदृष्टान्तस्यापि भोजनमात्र एव प्रतिषेधो न तस्य त्रैरूप्यपि सुवचनत्वेनते नापि होमादौ पवित्रं किं वस्यर्यते
नु स्पष्टं होमादिनिषेधश्च स्मृतिचंद्रिकायां॥ एकादश्यां रवग्राधीशो न होतव्यं सुरादि च युग विप्राग्रे इति स्वादिनग्रहेतिनरादयइति॥ महादोषमपंचा
न्न एकादश्यां न वेष्यतस्॥ न होतव्यं न भोक्तव्यं न प्राप्तव्यं विशेषतः इति॥ भुक्ते तु खे ति मा भूते यो भुंक्ते हरिवासरे॥ ताद्भुभोग पतितस्यातं
तस्माद्दुह्यपरे हत्तीति च॥ ब्रह्मवैवर्ते चाप्येकुर्वीत महीपाल श्राद्धमेकादशीदिने॥ त्रयस्ते नरकं यांति दाता भोक्ता च पापितेति॥ वरा
हपुराणे॥ चातुर्मास्ये कल्पे एकादश्यां प्रकृत्यलोकेनैव बाहारे प्रकुर्वीत नदिः ह्मल्मेजलं पिबेत्॥ न श्राद्धं न च कुर्वीत न होमं न च तर्पणं॥ य
दि मोहात्प्रकुर्वीत व्रतहानिर्न निष्फलं॥ मम द्रोही भवेद्यापि तृषितो नरकं व्रजेत् ज्ञापित त्रिर्नरकं व्रजेदिति च॥ अतो नादौ प्रमादात् यदि
होमादिकं चरेत्॥ रौरवं नरकं याति यावदाहूतसंप्लवमिति नारदीये॥ न होतव्यं न होतव्यं एकादश्यां कदाचन॥ उक्त्वा यदि
मनुष्यात्माज्ञानी नरकं व्रजेदिति स्कंदन्यारदीये॥ एकादश्यां तु शूद्रस्तन्यजुक्मापाद्यादि हुमरुः॥ निष्फलः संभवेद्धो
मः स्वयं च नरकं व्रजेदिति॥ भविष्यत्सर्वलि॥ वाराहे च॥ अतीपातश्च संक्रांति वैधृति र्वा यदा भवेत्॥ एकादश्यां तदाधिक्यान्नपाक
मातीकृत्वा पचेत॥ अपि वा पितृसूक्तानि स्वस्वशाखोदितानि च॥ तेनैव तत्प्रिमा यांति संप्राप्ते हरिवासरे॥ यदि मोहात्प्र
कुर्वीत मूढस्तस्मिन्दिने मम॥ पिंडदानं तर्पणं च श्राद्धहोमादिकं च न॥ न तेमूत्र समं तत्र हव्य कव्यं च विट् सममिति॥ न

ए·हो·नि· चैवमकरणे प्रत्यवायाप्रसक्तेस्तत्प्रयुक्तप्रायश्चित्तापत्तिरिति वाच्यं॥ हारकाधेन कर्मस्यापि बाधस्यापि त्यायप्राप्तत्वेनतरां स्त्ररुत्वसं
२ मतत्वात्॥ यथा स्वर्गकामो यजेतेत्याद्युक्ते तत्र कृष्णलं चरुं निर्वपेदिति श्रूयते॥ तत्र प्रकृतिवद्विकृतिः कर्तव्येति दलप्राप्तस्याप्यवघात
स्यतुषविमोकरूपद्वारा नादेनाप्रवृत्तस्य वाग्यत्वापसानदुष्टत्वेपि न वैगुण्यं एवमत्राप्यनुष्ठानरूपद्वारस्यैव दुष्टत्वेन तत्साध्यकर्म
णोननुष्ठानेपि न दोषः॥ तस्मादेकादश्यां होमस्य सर्वथा निषिद्धत्वेन तद्दिने यरूपस्यैकादश्यां नक्षत्रेष्ट्यनुष्ठानस्य वैकल्पिकानां मुत
रामसंभवः किं चैकादश्यां मिष्टिकरणे प्राशित्रेडावतुर्धाकरणी कृष्णाग हविःशेषाणां भक्षणानि विहितानि प्राप्नुवंति॥ तानिपा
ये चत्यार्थं दोषाय येष्टौ रीप्रतिशिवदा केः॥ पुरोडाशोपि वा मोहात्संप्राप्ते हरिवासरे॥ अन्यत्प्रसक्तः सर्वदा प्रोक्तः किं तु न ... मिति
वंरूपेण निषिद्धानि॥ ननु श्रौतस्य नित्याग्निहोत्रे नक्षत्रेष्ट्यनुष्ठानस्य कुतः केवलस्मृतिभिर्बाधः॥ नहि स्मृतिभिः श्रौतबाधः क्वा
पि निर्णीतः कानां संमतः॥ ननु कथं न संभवः वेदं कृत्वा वेदीं करोतीति श्रौतस्य क्रमस्य श्रुत आचामेदिति स्मृत्युक्तेनाचमनेन बा
धदर्शनादिति चेत् न आचमनेन श्रौतस्य क्रमरूपगुणस्य बाधे तिप्रधानबाधात्॥ प्रकृते श्रौतहोमस्य स्वरूपधानरूप राम·
त्वादिति॥ अतः कथमेतदिति चेत् उच्यते॥ स्मृतीनामेकादश्यादिमात्रविषयत्वेन निरवकाशत्वात् अहरहरग्निहोत्रविधायकानां २
श्रुतीनां चैकादश्यां व्यतिरिक्तहपरत्वेनापि सावकाशत्वान्निरवकाशाभिः स्मृतिभिः सावकाशश्रुतिबोधस्य न्यायप्राप्तत्वात्
यथोक्तं॥ आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति॥ अंगानि तस्य चैतदेकोचामवस्तु तस्तु तद्दिव एकादश्यां अ

ग्निहोत्रनक्षत्रेष्ट्यनुष्ठानस्य श्रुतिप्राप्तस्य केवलस्मृतिभिर्बाधं ब्रूमः॥ येनोक्तदोषः स्यात् अपि तु बाभ्रव्यादिश्रुतिभिः तन्मूलाभिः स्मृतिभिश्चेति॥
ननु केवलास्मृतय एवोक्ता न श्रूयत इति चेत्॥ तत्र श्रुतिः देवा वै प्रजापतिमब्रुवन् केन वै मनुष्याः स्तरंतीति स होवाच स्नानकर्म
णैव स्तरंतीति तान् उपदिष्टं कर्मस्वाध्यायस्वामी ... संध्या होमव्रतादयो व्रतेस्य ... परब्रह्म उपपद्येत॥ स हि
श्रेष्ठ पारं तारयतीति तेहोचुः॥ कथं तु जगदद्भिः होवाच एतस्मिन्नहनि दिवसे नाग्निं जुहुयात् न श्राद्धं कुर्यात्॥ किमपि नित्य
नैमित्तिकादि देवर्षिपितॄन् तर्पयेत् नस्वाध्यायं विनायं ... स्मात् द्वादश्यां ... जुहुयात् श्राद्धं दद्यात् ... पितृहास
मातृहास देवहास्ये ... वतीति स ब्रह्मणः सायुज्यं सलोकतां गच्छतीत्येवं वेदेति बाभ्रव्यश्रुतिः तथा पैंग्यश्रुतिश्च
एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ न श्राद्धे सोमो कुर्वीत देवादीन्न तु तर्पयेत्॥ इत्यादिश्रुतिबलेनोक्तस्मृतिबलेन चैकाद
श्यां होममात्रस्य निषिद्धत्वेन तद्दिने यन नक्षत्रेष्ट्यनुष्ठानस्य सुतरामसंभवः॥ अतः कथमेकादश्यां नक्षत्रेष्ट्यनुष्ठानमिति
चेत्॥ अत्रोच्यते॥ सत्यमुक्तवाक्यजातेनैकादश्यां होमेष्ट्याद्यनुष्ठानं निषिद्धमिति॥ तथापि न सर्वथा एकादश्यां होमेष्ट्यादिलो
पः॥ अपि तु तदनुष्ठानस्यैकादश्यामसंभवेपि द्वादश्यां संभवात्॥ न चैतत्कुत इति वाच्यं॥ मतं स्मृतौ हरिवासर इति विशेषेण द
र्नीति श्रुतिस्मृत्योरेकादश्यामिति स्मृतौ च ... दिवस इति च समसमी निर्देशान्नैकादश्यां होमादिकं निषिद्धं॥ न त्वेकादश्यां संबं
धिहोमादि तस्यात्वेति श्रुतिस्मृत्योरेकादश्यां त्याद्यपि ष्ठिनि देशः स्यात्॥ न तथा श्रूयते॥ अतो तामते एकादश्यधिकरण

कं होमादेव निषिद्धं न तु तत्संबंधिहोमादीति॥ तथा चैकादश्यामुक्तानुष्ठानासंभवेपि द्वादश्यां तदनुष्ठानांगीकारे बाधकाभा
२ वः ननु एकादश्यां निमित्तम् अस्यां श्रवणैर्णी द्विपि नैमित्तिकादिनिमित्तसप्तमी तस्यापि संभवेनैकादशीनिमित्तकस्य होमस्य न कर्त
व्य इत्यर्थः प्राप्तात् निमित्तकहोमस्यैकादश्यामिव द्वादश्यामप्यकर्तव्यत्वप्रसंग इति चेत्॥ स्यादेतदेवं यद्यत्र निमित्तसप्तमी त्वमं
गीकर्तुं शक्येत तन्न च तथा॥ न्याकुलेऽङ्गीकर्तुं तथात्वे एकादशीनिमित्तकहोमस्यैवाकर्तव्यत्वं स्यात् एकादश्यां लक्षहोमाद्यनुष्ठानम
पि शास्त्रे तत्र तेषां मते तत्स्यात्॥ एकादशीनिमित्तकस्तदनिमित्तको वा एकादश्यधिकरणको यः कश्चन होमः सर्वोपि निषिद्ध इ
ति स्पष्टं॥ एकादशीसंबंधिहोमादेर्द्वादश्यामनुष्ठानप्रतिपादकं गारुडपुराणस्य वाक्यजातं दर्शयति॥ तथा हि गरुडपुराणे
एकादश्यां रवग्रहाधीशान होतव्यं सुरादिषु॥ द्वादश्यां तच्च होतव्यं अन्यथा नरकं व्रजेदिति॥ नाग्निहोत्रं न च श्राद्धं न चौपासनमेव
कुर्यात् एकादश्यां प्रकर्तव्यं द्वादश्यामेव कारयेत्॥ कालातिक्रमदोषस्तु नास्त्यत्र शिवविष्णुहन्तः॥ गर्हितान्ने चान्नश्रुतिपितर राम. ३
श्राद्धे वै कथ इति स्कांदे॥ एकादश्यां हूयमानं राक्षसानां भवेद्धवं॥ द्वादश्यां हूयमानं तद्दानं लोकोपकल्प्यत इति स्मृतिसा
रे पाद्मे॥ एकादश्यां हूयमानं नास्तानो नरकावहं॥ द्वादश्यां हूयमानं तद्दानं लोकोपकल्प्यत॥ इति त्रिविधस्य दर्शिता॥ एकादश्यां
परित्यज्य द्वादश्यामेव कारयेत्॥ पितृश्राद्धादिकं कर्म प्रसह्य समुपस्थिते॥ हविष्योगो हि तत्त्वात् द्विनव्रट हन्ति द्विवोक्तस इति॥ नविष्णो
त्तरे॥ एकादश्यां यदा श्राद्धं नित्यं नैमित्तिकं भवेत्॥ तदुपवासं तदा कृत्वा द्वादश्यां श्राद्धमाचरेत्॥ एकादश्यां त्रयोदश्यां श्राद्धंस्य

प्रतिवत्सरं॥ द्वादश्यां वैष्णवैः कार्यं अन्यैरेव मृतेऽहनि॥ मृतकाहे यथा श्राद्धं मृतकाले विधीयते॥ तथैवैकादशीश्राद्धं विदध्याद्द्वाद
श्यादि न इति कारिके॥ मृते चास्तमिते सूर्ये मृते वैष्णवमृतके॥ तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत्॥ इति स्मृतिसारे॥ एका
दश्यां प्राप्तवत्यां मातापित्रोर्मृतेऽहनि॥ द्वादश्यां तत्र दातव्यं नोपवासदिने क्वचिदिति॥ विष्णोत्तरे॥ एकादश्यां तु प्राप्तायां माता
पित्रोर्मृतेऽहनि॥ तस्य दिवसं द्वादश्यामेव कारयेत्॥ तादृग्वचैव बकीरूणां तसितृणां च दुर्गतिः॥ एकादश्यां न तत्कार्यं क
र्तव्यं द्वादश्यां दिन इति वधाद्ये॥ तस्मात्तत्रैव मोहेन वाथवा कुर्यादेकादश्यां तु यो नरः॥ श्राद्धं पितृणां प्रीत्यावा तत्फलं श्रुणु पार्व
ति॥ भोक्ता श्राद्धं विक्रायी अन्नदाता तथैव च॥ तथा तत् पितरः श्रेष्ठा तत्पापा माश्रुतत्कुलं॥ एकैकस्य कुलं स्य ह्येकुलानि त्रात
संख्यया॥ प्राप्नुवंति न मोघोरं पुनरापि ह्युर्जितमिति॥ तथा नाममहात्म्ये पंचरात्रागमोक्तं वचनं॥ तिलोदकं पिंडदानं श्राद्धे
होमं च तर्पणं॥ निन्दानं चान्नदानं न कुर्याद्धरिवासरे॥ उपोष्य चार्चयेद्विष्णुं उभयोरपि पक्षयोः॥ यत्तेहोमे तथा दाने नैव ब्राह्मण
नो च तर्पणे॥ पारणे चापि संजेत्प्रशस्ता द्वादशीति विधिरिति॥ न चैवमेकादशीसंबंधिवैदिकदेवादेरपि द्वादश्याकर्तव्यत्वप्रसंग इ रामं.
ति वाच्यं॥ न हि वयं न तथा एकादशीसंबंधिहोमश्राद्धादेर्द्वादश्यां कर्तृत्वं ब्रूमः॥ अपि तु उक्तवचनजातेन लादे वचनजाता
दश्यां किमपि वचनं एकादशीसंबंधिदेवादेर्द्वादश्यां कर्तव्यत्वप्रतिपादकं प्रतीयते॥ येन तत्प्रति मन्नन्तु होमत्वाविशे
षात् एकादशीसंबंधिहोमस्य द्वादश्यामनुष्ठानप्रतिपादकवाक्यस्येव एकादशीसंबंधिवेदादेरपि द्वादश्यामनुष्ठाने

ए॰ हो॰ नि॰
४

प्रतिपादकस्यापि संभवेन तादृशवाक्याभावो ऽसिद्ध इति चेन्न ॥ स्यादेतदेवं यदि होमपदस्य होमसामान्यवाचकत्वं स्यात् ॥ नैवेत
दस्ति ॥ नाग्निहोत्रमित्यादिवाक्यशेषेण बलेन होमसामान्यवाचकस्य होमपदस्याग्निहोत्रादिहोमविशेषपरत्वसंभवात् ॥ यथाहि
पुरोडाशं चतुर्द्धा करोतीति वाक्यप्राप्तस्य पुरोडाशमात्रचतुर्द्धाकरणस्याग्नेयं चतुर्द्धा करोतीति वाक्यशेषबलेनाग्नेयपुरोडाश
मात्रचतुर्द्धाकरणे पर्यवसानं चैतथा प्रकृतेऽपीति ॥ न चैवमेकादशीनक्षत्रेष्ट्यादिद्वयमनुष्ठानासंभवः ॥ होमसामान्यवाचक
स्य होमपदस्य वाक्यविशेषबलेनाग्निहोत्रादिरूपहोमविशेषप्रतिपादकत्वकल्पनवदग्निरेव व्यवस्थापितत्वादिति वाच्यं ॥ अग्निहो
त्रपदस्य श्रौतमात्रोपलक्षणकत्वात् ॥ न चौपासनपदस्य स्मार्तकर्मोपलक्षणकत्वमिति वाच्यं ॥ अग्निहोत्रस्य कर्मोपलक्ष
कत्वस्य वसन्तेत्यंगीकुर्मः ॥ अपि तु यद्यनंगीकारे श्रौतसंख्यानुपपत्तिरतस्तदुपलक्षकत्वं न हि औपासनपदस्य स्मार्तक
र्मोपलक्षकत्वानंगीकारे तादृशं बाधकमस्ति येन तथा प्रतीमः ॥ तस्मादेकादशीहोमस्य द्वादश्यामनुष्ठानांगीकारे बाध
काभावादुक्तं ॥ तद्विशेषरूपैकादशीनक्षत्रेष्टिर्द्वादश्यामनुष्ठानं वेत्यवानामिति सिद्धं किं च यथा बोधायनीये नक्षत्रेष्टि
षु प्रवर्तमानासु संकल्पप्रवृत्तासु समाप्तिः पत्न्या मनालंबुकायां प्रसूतायां वा प्रतलादूर्ध्वं गोत्थे वाति पत्न्यास्य यः क्रियते राम॰ ४
॥ यथा वा सोमयागारंभोत्तरं अप्सुदीक्षायां ॥ प्रागनालंबुकायां यावत्स्नानं कर्मत्यक्तानंतरमप्सुदीक्षाकर्मणः तथा प्रवर्ग्यो
पक्रमात्प्राक् चेत्सहं प्रवर्ग्यस्याविरामं कृत्वा स्नानानंतरमप्सु प्रवर्ग्यादिरंगः ॥ प्रवृत्ते प्रवर्ग्ये पितयालेतदहः प्रातःसायं प्र

वर्ग्योपसदः कृत्वा विरम्य स्नानानंतरं अपवर्ग्योपसदः कृत्वा विरम्य स्नानानंतरं अपरप्रवर्ग्योपसदाकरणीतयासुत्या दृवि
तामार्जालीये परिश्रिते सिकतां विकीर्य तत्र विनिवेश्य सुत्यासमाप्य चतुर्थ्यां हविस्नानानंतरं अवभृथस्नानं तदुक्तं बोधाय
नसूत्रे अथ यदि दीक्षोपसत्सु तथाहर्गणेष्वरहःसु वत्तयात्वहे पर्यवेति इति अथ यदि सोमाधानमस्य पुरा दीक्षणी
याः अनालंबुकाभवति ॥ अहः पर्यवेति प्रकृदीक्षाप्रवृत्तिसिद्धमित्यादि च ॥ यथा वा आपस्तंबबौधायनीयैः प्रोषिते यजमा
ने त्रेत्यैराग्निपसंरत्नस्यलाभ्यां पंचमेऽहनि यागः क्रियते ॥ यथोक्तं भाष्यमपदेव्यां च प्रोषिते यजमाने ब्रजेत्यहनी पत्नी
रजस्वला चेत्तदा पंचमेऽहनि यागः इति ॥ एवमस्मात्रिपि एकादशीनित्यहोमनक्षत्रेष्ट्योर्द्वादश्यामनुष्ठानांगीकारे बाधका
भावात् ॥ न तु ते व्यसन तयोस्तत्परयागः क्रियते ॥ अपि तु पत्न्या नालंबुकत्वादीनिमित्तेनेति वेद्यं ॥ सममस्माकमपि ॥ द
यमपि एकादशीनित्यहोमनक्षत्रेष्ट्योर्द्वादश्यामनुष्ठानं कुर्मः ॥ अपि त्वेकादश्यां हविर्गर्हितत्वप्रयुक्तदेवा यथाशास्त्र
त्वमिति तेनेति ॥ तस्मादेकादशीसंबंधिहोमाद्यनुष्ठानस्य द्वादश्यामंगीकारे बाधकाभावाद्युक्तमेकादशीनक्ष
त्रेष्ट्यनुष्ठानं द्वादश्यामिति सिद्धं ॥ अत्र केचिदेकादशीहोमनिषेधकवाक्यबाधभयात् सर्वथा तस्याकरणमेवाहु
स्तन्न ॥ तथा हि तस्य बाह्यतस्याग्निहोत्रस्य सप्तचत्वारिंशत्पत्तिश्च संवत्सरे साम्यमाकृतयः संततेन वर्तितात्विति

ए॰ हो॰ वि॰ ५

ऋतिश्च संवत्सरे प्रातरग्न्रुतयहति श्रुतिप्रोक्तायाः संवत्सराकृतिसंख्यायाः स्फुटो बाधः जन्माष्टमीसहितचतुर्विंशत्येकादशीसंबं-
धिकानां शतहोमानां श्रवणाद् स्मृतिरिक्तयोः प्रासयोः ततोधिकानां च लोपप्रसंगः॥ न च भवदुक्तरीत्यानुष्ठितेपि तिथीनां वृद्धिक्ष-
यामिलितेनत बाधः सममेवेति वाच्यं॥ सावनमासघटितसंवत्सरांगीकारेण श्रुतिप्राप्ताकृतिसंख्योपपत्त्या अस्मत्पक्षेत
बाधकस्य वक्तुमशक्यत्वात्॥ किंचैकादशीहोमस्य सर्वथा करणे एकादशीसंबंधिहोमादेर्द्वादश्यामनुष्ठानप्रतिपादको-
क्तवाक्यजातविरोधापत्तिः तस्मात्सर्वथा करणमयुक्तं॥ किंचैवमेकादशीनिरुक्तहोमस्य शेषहोमेन समस्य होमेन वाक-
थंकिंचित्पूर्वमनुष्ठेयत्वेपि एकादशीनक्षत्रेष्ट्यनुष्ठानस्य दशम्यादिदिवसेषु कर्तव्यत्वं विशिष्टप्रमाणं विना अपकर्ष-
योगात्॥ उत्कर्षस्येव चोक्तप्रमाणजातसिद्धत्वात्॥ अर्द्धचरतीयानुपपत्तेश्च॥ ननु तस्य पूर्णे उद्र पूर्णार्थकहृदुत् उद्र-
प्रत्ययांतस्यैकादशीशब्दस्य एकादशत्वसंख्यापूरकत्वं॥ तिथिमात्रवाचकत्वे क्षयेऽध्योः पारणादिवसगदशम्यादि- राम॰
वसयोः होमप्राप्तिः॥ सोरोमार्गे विवाहादौ यज्ञादौ सावनस्मृत इति ज्योतिर्गर्गवचनेन यज्ञादौ तद्वत्कत्वाद्वम- ५
गमत्वादिति॥ संवत्सरस्तावत्पंचविधः बार्हस्पत्यचांद्रमसौरनक्षत्रसावनभेदात्॥ तत्रपंचापि बार्हस्पत्यस्यत्रयोद-
शमासात्मकत्वेन वक्रातिचारनैदैनैतत्संख्यापूरकत्वं नास्ति॥ चांद्रस्य तु द्वादशमासात्मकत्वेपि मासानांत्रिं-

शद्दिनात्मकत्वनियमाभावेन पंचपंचाशदधिकशतत्रयदिनात्मकत्वादि नानविवक्षितत्वात्॥ दिनानविवक्षितसंख्यापूरकत्वं
सौरस्य च पंचषड्युतरशतत्रयदिनात्मकत्वेन नोक्तसंख्यापूरकत्वं॥ नाक्षत्रस्य चतुर्विंशत्यधिकशतत्रयदिनात्मकत्वेन विवक्षि-
तसंख्यापूरकत्वं नास्ति॥ तथा च सावनसंवत्सरग्रहणेन संख्यापूर्तिसंभवात्॥ अपरे तु एकादशीहोमनिषेधकवाक्यबाध-
प्रसक्त्या एकादश्यादौ होमादाकृतिसंख्याबाधप्रसंगात् सर्वथा अकरणं च अभ्यंततः दशम्यादिपूर्वदिवसेषु वशेषहो-
मेन समस्य होमेन वा एकादशीहोमं संपादयतां श्रौताकृतिसंख्यापरिपूर्तिर्भाक्तः तदपि न अस्मदुक्तरीत्योक्तबाधक-
द्वयपरिहारे संभवति॥ भवदुक्तरीत्या बाधकद्वयपरिहारे नियामकाभावात्॥ न चैते वाक्यदोषः समं इति वाच्यं॥ मानुक्तादे-
नविषयत्वे वारणहन्दिवचनानामुक्तार्थनियामकानां सत्वेन नियामकाभावोक्तेः॥ वस्तुमशक्यत्वात्॥ नरिसता-
दशीवाक्यं भवत्पक्षेप्रतिपक्षं शेषहोमादि प्रतिपादकं श्रूयते॥ येन भवदुक्तरीत्या शेषहोमादि करणेन बाधकद्वय-
परिहारं स्वीकुर्मः॥ तस्माद् अस्मदुक्तरीत्यैव बाधकद्वयस्वीकारो युक्तो न तु शेषहोमादिकरणेनेति॥ ननु एकादशी-
शब्दस्योपवासादिनमात्रपरत्वे विष्णुपंचकाद्युपवासदिनेपि होमप्राप्तेः॥ जन्माष्टम्यादिदिवसेषु च होमप्राप्तिश्चेति
चेन्न॥ एकादशीपदस्य नित्योपवासदिनपरत्वांगीकारात्॥ मदुक्तरीत्या प्रत्यवायस्तदेव नित्यत्वं विवक्षितं॥ न
हि विष्णुपंचकाद्युपवासाकरणे प्रत्यवायोस्ति॥ येन तत्र होमप्राप्तिः॥ नापि पूर्वोक्तरीत्या दिने ष्यो होमप्राप्तिः॥ तयोर्नि-

ए॰ हो॰ नि॰ ६ सोपवासदिनत्वान्नावातग अपिवाजस्या द्वादश्यादौ हिं होमाप्राप्तिः॥ तदकरणे प्रसक्तप्रत्यवायेन तन्निरसनत्वावगमादिति॥ पार
णादिवसे चहरिवासरप्राप्तौ तमतिक्रम्यैव होमादिकं कर्तव्यं॥ तदुक्तं वसिष्ठेन चातुर्मास्यकल्पे॥ प्रातःकाले तु क्षद्रयोपदा
स्याद्धरिवासरे॥ तत्परं श्राद्धहोमादि हि नित्यनैमित्तिकं तथा॥ कुर्वीत चान्यथा नानिव्यतीपाते हरिवासर इति॥ नन्वेवं
गुरुपरंपराप्राप्ते कादश्यां सुदर्शनहोमानुष्ठानं न सिद्ध्येत्॥ एकादश्यां न होतव्यमिति सामान्यनिषेधस्य तत्रापि प्र
सराद्दिति चेत्॥ मैवं॥ अस्ति हि तत्रोपायः अन्वाधानादिदेवामुद्दिश्यैको होमः॥ विष्णुमुद्दिश्यैकापरः॥ तत्राद्यं द्वादशे
कादश्यामसंभवेपि द्वितीयस्य संभवात्॥ न चैतत्कुतः॥ यतः स्मृतौ॥ हविर्योग इति तत्राहिनं गच्छति दिवौकस इति॥ ग
र्हितान्नं नचाश्नंति पितरश्च दिवौकस इति च॥ दिवौकसामेव ग्रहणात्॥ तेन जानीमो विष्णव्यदेवानां ग्राह्यत्वमेव
हविष्यन्नादित्वमपि॥ तथा चैकादश्यां परंपराप्राप्ते नैवेद्यनिवेदनाचरणं अन्नं दद्यात्॥ कृष्णाहे भगवंते हरिवि
नेत्सन्नान्नपदमपि स्पर्शमाप्नुयात्॥ तथा चान्वाधानादिदेवानां केवलं मंत्रोच्चारणपूर्वकं विष्णुदेवताकमंत्रैरेव होमां राम॰
गीकारे वा अन्वाधानादिदेवतास्थाने विष्णुमुद्दिश्य मूलमंत्रेणैव होमांगीकारे वा न बाधकं पश्यामः॥ तदुक्तं स्मृ ६
तिकौस्तुभे॥ दत्तात्रेयसंहितायां॥ एकादश्यां यदा ब्रह्मन् सुदर्शनमखो भवेत्॥ अन्वाधानादिदेवानां मंत्र
मुच्चार्य केवलं॥ तत्स्थाने विष्णुमुद्दिश्य मूलेन जुहुयात्सुधीरिति॥ अथवा द्वादशीदिन एव होमांगं सुदर्शनहोमं वि
त

धायतमेवाग्निं संरक्ष्य तस्मिन्नेव तप्तमुद्राधारणमेकादश्यां कुर्यात्॥ अपि वा न इति॥ तमग्निं समर्च्य एकादश्यां तप्तमुद्राधारणं कु
र्यात्॥ तदुक्तं स्मृतिचंद्रिकायां॥ लौकिकाग्निं समर्च्यैव तप्तमुद्रां च धारयेत्॥ अग्निनाग्निः समिध्यत इत्यादि ऋग्जपपूर्वकं॥ अ
ग्निस्पृष्टिं वाजमिति वर्गं वैखिजपेत्क्रुध इति॥ तद्धि तद्दिने प्युतु॥ विधितः स्थंडिलं कृत्वा होमं कुर्याद्विचक्षणः॥ होममंत्रेषि
तप्तमुद्रां धारयेद्बुद्धिमान् दतः॥ तस्य पुण्यमनंतं स्याद्धत्वारे पुण्यसहस्रशः॥ तस्माद्धरिदिने त्याज्यं होमे मौं जीविकादयोः॥
नित्यं होमं चाग्निकार्यं सजे हरिदिने बुध इति च॥ तस्मादेकादश्यां सुदर्शनहोमानुष्ठानमुक्तविधयासंपाद्यैव तप्तमुद्रा
धारणं कर्तव्यमिति सिद्धं॥ ननु यदा द्वादशी अतीव स्वल्पा यां तस्यां द्वित्रिनक्षत्रेष्ट्याद्यनुष्ठानकरणे तत्काद्यरुपत्त्रेघ
नं स्यात्॥ तच्चानिषिद्धं॥ कलाकाष्ठा घटिका वापि परे पुरर्द्वादशी यदि॥ द्वादशी द्वादशी हंति षष्टिदश सीयिन लंघितेति॥ साध
नीयातिपत्तेन यतः सा साधनीयैव तत इति च॥ स्वल्पायां यदि द्वादश्यां पारणं विदधाति यः॥ व्रतं पूर्णं भवेत्तस्य व्रतलोपो
न्यथा नवेत्॥ द्वादशद्वादशी हंत्यतिक्रांतानसंशय इति भत्वा॥ अतः कथं पारणापपत्तिरिति चेत्॥ सत्यं द्वित्रिन
क्षत्रेष्ट्याद्यनुष्ठानं सर्वमप्युपुदयात्प्रागपकृष्यैव कर्तव्यं॥ तथा च वराहपुराणे स्कंधे धरणीवराहसंवादरूपे
वाक्यजातं॥ धरण्युवाच यदा स्याद्द्वादशी स्वल्पा नित्यं कर्म कथं भवेत्॥ होमश्च वैश्वदेवश्च कदा कार्यो विदस्व तत्॥
श्रीवराह उवाच॥ त्रयो पामासत्रयोनागस्तन्त्रा ड्रोमंतप जेदुधः॥ जागे दृतीये स्नानात्तु नित्यकर्माणि का

रयेत्॥ आमध्याह्नानि कर्माणि रात्रावेव विधाय च॥ स्वल्पायामपि भक्त्यां पारणं रविदर्शने॥ यदा सूर्योदयात्पूर्वं घटि-
कैकाविशिष्यते॥ स वै सूर्योदयो नाम मुनिभिः परिकीर्तितः॥ तत्पूर्वघटिकैकान्तु प्रातःकाल इतीरितः॥ माध्याह्निकं तदा
कुर्यात्किमं सूर्योदये तथा॥ वैश्वदेवं ततः कुर्यात् ब्रह्मयज्ञं च तर्पणं॥ अपोशानं विधायैवमतिक्षेत्रविद्दर्शने॥ अरुणोदय
तः पूर्वं कृतः स्नानं यदा भवेत्॥ यतः पर्युषितं तत्स्यात्साधनं द्वादशीदिने॥ तथा विधायपुण्यायां पितुः श्राद्धं भवेद्यदि
दि॥ द्वादश्यां ब्राह्मणान्पूर्वं भोजयित्वा फलं लभेत्॥ न तत्र व्रतहानिः स्याद्भुंजानस्य ततः परं॥ पत्नीपतिव्रता या स्यात्स
राधीनापि यो नरः॥ स तीर्थपारणं कृत्वा पश्चाद्भुंक्त्वा फलं लभेत्॥ गारुडे च॥ यदाल्पा द्वादशी चेत्स्यादपकर्षो हुते
र्वेत्॥ विधेर्माध्याह्निकस्यापि तत्रस्यादपकर्षणमिति॥ स्कांदे च॥ यदा भवति चाल्पा सा द्वादशी पारणे दिने॥ उषः
काले द्वयं कुर्यादेकादश्यां पक्षेपक्षे चोपवसेन्न तत्रस्याद्धाहाकारः॥ अथ तत्संबंधे कंचिन्मुनेर्धारयेत्॥ इत्यादिस्मृतिमू
लकस्फुटतरप्रमाणादिकारणशाखायन्नातपथब्राह्मणे उपोसनामे मूलकोशेदृष्टव्यानि॥ ॥इति ब्रह्मदेवज्ञैर्भवि राम·
ष्योत्तरनारदीयपंचरात्रपाद्मवाराहपुराणेषु एकादश्यां होमाकारणनिर्णयः समाप्तः॥ श्रीरामप्रीताकांतापरिमस्तु॥ ७